॥ ओ३म् ॥
सहैव मृत्युर्व्रजति सह मृत्युर्निषीदति।
गत्वासुदीर्घमध्वानं सहमृत्युर्निवर्तते॥
२.१०५.२२॥ वाल्मीकिः।

दुर्लभो विषयत्यागो
दुर्लभं तत्वदर्शनं।
दुर्लभा सहजावस्था
सद्गुरोः करुणां विना॥
महोपनिषत् 4/77

RNI No. : DELSAN/2011/38660 ISSN 2321 - 4937 DL(E)-20/5534/2024-26
Posting Date.: 4-5, 19-20 of Every Month

सत्यनिष्ठा जयेल्लेखनी निर्भया

# संस्कृत – संवादः

पाक्षिकं समाचारपत्रम्

संपादकीयकार्यालयः ए-२/३२, वजीराबाद मार्गः, भजनपुरा, देहली-११००५३, दूरभाषः ९३११०८६७५१
ई-मेलः sanskritsamvad@gmail.com वेवसाइटः www.sanskritsamvad.com मूल्यम्-रू. १०/-

॥ ओ३म् ॥
आसन्नं ब्रह्मणस्तस्य
तपसामुत्तमं तपः ।
प्रथमं छन्दसामङ्गः प्राहुर्व्याकरणं
बुधाः ॥11॥ वा.प.

वने रणे शत्रुजलाग्निमध्ये
महार्णवे पर्वतमस्तके वाद्य
सुप्तं प्रमत्तं विषमस्थितं वा,
रक्षन्ति पुण्यानि पुरकृतानि॥
- नीतिशतकम् ( भर्तृहरिः )

卐 वर्षम्-१४ 卐 अंकः-०३ ( ३१५ ) नवदेहली 卐 १ अगस्तमासः २०२४तः १५ अगस्तमासः २०२४ पर्यन्तम् 卐 विक्रमसंवत्-२०८१ 卐 सृष्टिसंवत्-१,९६,०८,५३,१२४ 卐 पृष्ठम्-८

## श्रीमद्दयानन्दकन्यागुरुकुलमहाविद्यालयचोटीपुरायां नवप्रविष्टबालिकानाम् उपनयनवेदारम्भसंस्कारः समनुष्ठितः

चोटिपुरा – समारोहे नवीन महाविद्यालय भवन ‘संस्कृति नीडस्यापि उद्घाटनं जातम्। तत्र ‘राष्ट्रिय स्वयंसेवक संघस्य (RSS)’ सरसंघसंचालकः, श्री मोहनराव मधुकरराव भागवतः , केंद्रीय संस्कृत



विश्वविद्यालयस्य (नवदेहली) च कुलपतिः आचार्यः प्रो० श्रीनिवास वरखेड़ी च उपस्थितौ। प्रातः वेलायाम् आयोजिते यज्ञे उपनयन संस्कारे गुरुकुलस्य मुख्याधिष्ठात्री पूज्या आचार्या डॉ० सुमेधा जी नवप्रविष्टबालिकानाम् उपनयनसंस्कारम् अकरोत्। संघ प्रमुखः श्री मोहन

शेषभागःद्वितीयेपुटे




## पतञ्जलियोगपीठे आस्थाभक्तिभ्यां सह गुरुपूर्णिमामहोत्सवः सम्पन्नः

हरिद्वारम् । गुरु-शिष्ययोः पवित्र परम्परा प्रतीकं ‘गुरु पूर्णिमा’ पर्व पतंजलि योगपीठस्य संस्थापकः



स्वामी रामदेवः महामंत्री आचार्य बालकृष्णः इत्यनयोः सान्निध्ये समाचरितम् । स्वामिना रामदेवेन कथितं गुरु पूर्णिमा भारतस्य गुरु परम्परा, ऋषि परम्परा, वेद परम्परा सनातन परम्परा च अत्यंतं गौरवपूर्णा पूर्णता प्रदायकं पर्व विद्यते। भिन्न कारणैः पूर्णेस्मिन् जगति सर्वस्य दृष्टिः भारतं प्रति विद्यते यद्भारतात् पूर्ण संसाराय शिक्षा, चिकित्साक्षेत्रे पारिवारिके, आर्थिके, सामाजिके, राजनीतिक जीवने नूतना दिङ् प्राप्यते । अस्यां दिशि भारतं सर्वदैव कार्याणि कुरुते। अतः एव भारतं विश्वगुरु विद्यते।

अस्मिन् अवसरे आचार्येण बालकृष्णेन कथितं यद्गुरु पूर्णिमा पर्व सर्वस्य जीवने सात्विकतां पवित्रताम् आनयेत् पूर्वजानामिव जीवनमिव जीवनं जीवितुं संकल्पं वयं स्वीकुर्याम।स्व जीवने कञ्चन आदर्श गुरुं, महापुरुषं वा आश्रित्य आलम्बनं कुर्याम येन अस्मज्जीवनं छिन्नसंशयं भवेत्।

कावंड़ यात्रा विषये आचार्येण कथितं कांवड़िया इत्यभिधेयाः शिवभक्ताः आहूयन्ते यत् भवद्भिः महत्तपः क्रियते स्व वाण्यां व्यवहारेऽपि संयमोऽपेक्षितः विद्यते। श्रद्धायां-भक्तौ च न तु उद्दण्डता अपेक्ष्यते न कस्मैचित् कष्टदानञ्च।

अस्मिन् अवसरे पतंजलि योगपीठेन सम्बद्धानाम् एकांशिकानां सेवाप्रमुखाः, संन्यासिगणः, एकांशिका प्रमुखाः, विभागाध्यक्षः, प्रभारीगणः इत्येभिः सहिताः छात्र-छात्र्याश्च उपस्थिताः आसन्।

## पाणिनिसंस्कृतविश्वविद्यालये गुरुपर्वणः आयोजनम्

डॉ.दिनेश चौबे, उज्जयिनी

गुरुपूर्णिमायाः शुभावसरे उज्जयिनीस्थ महर्षिपाणिनि संस्कृतवैदिकविश्वविद्यालये विशिष्टव्याख्यानस्य गुरुवन्दन कार्यक्रमस्य च आयोजनं जातम्। कार्यक्रमस्य शुभारम्भः वैदिकमङ्गलाचरणेन सञ्जातः। मुख्यातिथिः उज्जयिनीस्थस्य रेतीघाटस्थस्य श्रीसिद्धेश्वरहनुमानमन्दिरस्य महन्तः ब्रह्मज्ञानिस्वामिदिव्यानंदमहाराजः



आसीत् । स्वामिवर्येण स्वउद्बोधने उक्तं यत् गुरुः, आचार्यः, सर्वदा पूजनीयः एव गुरुः सर्वदा शिष्यस्य कल्याणाय प्रयत्नशीलः भवति। गुरुपूर्णिमा गुरु-शिष्य परम्परायाः परिचायिका अस्ति। ईश्वरतुल्यं गुरोः महत्त्वं विद्यते। तेन विविधपौराणिककथानां माध्यमेन गुरोः महिमा व्याख्यातवान् । विशिष्टातिथिरुपेण उपस्थितः विक्रमविश्वविद्यालयस्य संस्कृतविभागस्य पूर्वविभागप्रमुखः प्रो. केदार नारायणजोशीमहाभागः उक्तवान् यत् सनातनपरम्परायां गुरुस्थानं देवानाम् अपेक्षया उच्चतरं भवति। अनेकेषु शास्त्रेषु, पुराणेषु, उपनिषद्षु च गुरुविषये विस्तरेण लिखितम् अस्ति। अतः जीवने गुरोः विशेषमहत्त्वमस्ति। आदिपरम्परानुसारं गुरुपूर्णिमा महर्षिवेदव्यासस्य जन्मदिनस्यरूपेण आचर्यते। आध्यक्षीय उद्बोधने कुलगुरुः प्रो. विजयकुमारसीजीमहोदयेनोक्तं यत् भारतीयसनातनसंस्कृतौ गुरुशिष्यपरम्परायाः विशेषमहत्त्वमस्ति।

वस्तुतः वयं गुरुद्वारा एव वास्तविकतां ज्ञातुं समर्थाः स्मः। गुरुसान्दिपिन्या शिक्षाबलेन एव श्रीकृष्णः

शेषभागःद्वितीयेपुटे

# ‘बाल-भारती-पब्लिकविद्यालये गीताश्लोकवाचनस्पर्धायाः सफलानुष्ठानम्’

वार्ताप्रेषकः डॉ. युवराजः भट्टराई

दिल्ल्यां सर गंगाराम-चिकित्सालय-मार्गस्थे बाल भारती पब्लिक विद्यालये ऐषमो जुलाई पञ्चविंश्यां गुरुवासरे गीता-श्लोक-वाचन-स्पर्धायाः विशिष्टम् आयोजनं जातम्, एषा स्पर्धा प्रधानाचार्यस्य श्री लक्षवीर सहगल महोदयस्य प्रेरणया अनुष्ठिता। यस्यां स्पर्धायां शताधिकाः विद्यार्थिनः सहभागितां कृतवन्तः। एषः स्पर्धाकार्यक्रमः न केवलं विद्यालयस्य विद्यार्थिभ्यः एकः महत्त्वपूर्णः शैक्षिकः गतिविधिः आसीत, प्रत्युत संस्कृतम्प्रति भारतीयां संस्कृतिम्प्रति च छात्राणाम् अभिरुचेः ज्ञानस्य च संवर्धनार्थमपि एकः महत्वपूर्णः प्रयासः आसीत्।



एतस्मिन् गीता-श्लोक-वाचन-स्पर्धा-कार्यक्रमे मुख्यातिथित्वेन प्रसिद्धः कविः लेखकश्च आकाशवाण्याः वरिष्ठौधिकारी सहायको निदेशकः श्रीयुत रामावातार बैरवा महोदयः उपातिष्ठत। साकमेव प्रधानाचार्यः श्रीयुतः लक्षवीर-सहगल-महोदयः, उप-प्रधानाचार्या, विनीता-धवनवर्या मुख्याध्यापिका नीता निझारा महोदया चापि सहित छात्राणाम् उत्साह-वर्धनार्थम् उपस्थिताः आसन। अथ च विद्यालयस्य नैके शिक्षकाश्चापि अस्मिन् अवसरे उपस्थिताः आसन्, यैः बालकानाम् उत्साहवर्धनं कृतम् कार्यक्रमस्य गरिमा चापि वर्धितः।

स्पर्धायाम् अस्यां सहभागिभिः छात्रैः श्रीमद्भगवद्गीताग्रन्थस्य प्रचितानां विभिन्नानाम् अष्टश्लोकानां वाचनं कृतम् । प्रतिभागिभिः स्वीयाद्भुत-प्रस्तुतिभिः समैपि उपस्थिताः अतिथयः शिक्षकाः दर्शकाश्च मन्त्रमुग्धीकृताः।

मुख्यातिथित्वेन समागतः आकाशवाण्याः सहायकनिदेशकः, यो हि एकः प्रतिष्ठितः कविः लेखकश्चापि वर्त्तते, तेन निजोद्बोधने भारतीय-संस्कृतेः संस्कृत-साहित्यस्य महत्त्वविषये छात्राः अवगतीकारिताः। अमुना भणितं यत् , ‘गीतायाः श्लोकाः न केवलम् अस्माकम् आध्यात्मिकं मार्गदर्शनं कुर्वन्ति, प्रत्युत अस्माकं जीवनस्य विभिन्न-पक्षाणां प्रबोधने अपि सहायतां कुर्वन्ति। गीतायाः अध्ययनेन नैतिकतायाः अनुशासनस्य आत्म-प्रेरणायाः, कर्मणश्च शिक्षा प्राप्यते, एतद्धि बालकानां समुज्ज्वल-भविष्याय अत्यन्तमेव महत्वपूर्णमस्ति।’ अतिथिवर्यस्य वक्तव्यानन्तरं छात्रैः प्रश्नोत्तर-संवाद-सत्रे तस्य पुरतः निजजिज्ञासापूर्णाः प्रश्नाः उत्थापिताः अतिथिवर्येण च तेषां प्रश्नानां समुत्तराणि प्रदत्तानि।

उप-प्रधानाचार्या श्रीयुता विनीता धवन वर्या छात्रान् सम्बोधयन्ती प्रेरयन्ती च प्रावोचत्, यत् ‘भवद्भिः सर्वैः छात्रैः गीतायाः श्लोकानाम् अद्भुतं वाचनं कृतम्। एतद् न केवलं भवतां भाषीयां क्षमतां विकासयति प्रत्युत भवत्सु आत्म-विश्वासं दृढतां चापि निधापयति। ‘मुख्याध्यापिका श्रीमती नीता निझारा तेषां सुष्ठु प्रस्तुतीनां कृते विद्यार्थिनः ‘लाघयन्ती न्यगादीत्’ यत् भवन्तः सर्वे परिश्रमेण अभ्यासेन च स्पर्धामिमां सफलां कृतवन्तः। गीतायाः श्लोकानाम् अध्ययनं तेषां वाचनं च भवतां चरित्र-निर्माणे सहायकं भविष्यति।’ आयोजनस्य अन्ते, सामूहिक शान्ति पाठादनन्तरं सर्वैः छात्रैः शिक्षकैः अतिथिभिः च सह सम्भूय सामूहिकं चित्राङ्कनं स्वीकृतम्। कार्यक्रमस्य सफलतायां विद्यालयस्य वरिष्ठ-संस्कृत-शिक्षिकायाः डॉ. ज्योत्स्ना महोदयायाः, हिन्दी शिक्षकस्य श्रीयुत उमेश भारद्वाजस्य छात्राणां च परिश्रमस्य समर्पणस्य च योगदानम् अवर्तत। एतस्मिन् अवसरे न केवलं विद्यार्थिनः संस्कृतं प्रति प्रोत्साहिताः अपितु ते भारतीयसंस्कृतेः साहित्यस्य विषये चापि अवबोधिताः। एतद् आयोजनं बाल भारती पब्लिक विद्यालयस्य शिक्षां प्रति समर्पणस्य विद्यार्थिभ्यः व्यापक-समृद्ध-शैक्षिकानुभव-प्रदानस्य च प्रतिबद्धतां प्रदर्शयति। समस्तस्यापि कार्यक्रमस्य समन्वयकत्वं समवाप्तसाहित्याकादेमीयुवपुरस्कारः डॉ. युवराजभट्टराई वर्यः समभालयत्।

---

## प्रथमपुटस्य शेषभागः श्रीमद्दयानन्दकन्यागुरुकुलमहाविद्यालयचोटीपुरायां....

भागवतः बालिकाभ्यः इस अवसरेस्मिन् पित्रा दीयमानम् उपदेशम् आशीर्वादं च प्रदत्तवान्। नूतन महाविद्यालय भवनस्य उद्घाटनात् वृक्षारोपण कार्यक्रमात् परं गुरुकुलस्य छात्राभिः सांस्कृतिक कार्यक्रम माध्यमेन



# गुरुपूर्णिमायाः समारोहः सिद्धार्थ महाविद्यालये सम्पन्नः

(वार्ताहरः वत्स देशराज शर्मा)

२२/०७/२०२४ तारिकायां सिद्धार्थ उपाधिमहाविद्यालये गुरुपूर्णिमापालितमभुत। अवसरे



अस्मिन्महाविद्यालयस्यध्यक्ष महोदय डॉ.धीरेन्द्रकुमारनायकः सभापति आसन्।

इतिहासविभागप्रमुखप्राध्यापकः गोपालकृष्णदाशः मुख्यातिथिरूपेण तथाश्च राजनिति विभाग मुख्य:प्रध्यापकः रुद्रनारायण दाशः सम्मानितातिथीरूपेण आसन्। अवसरे अस्मिन् मुख्यवक्तृ रूपेण इंराजिविभागीयमुख्याध्यापकः वाणीप्रसादविश्वालः तस्य भाषणेन निगदितं प्राचीन काले यादृशीगुरुपरम्परा आसीत् तत्र तु छात्राणां श्रृंखला तथा च चरित्रादि विषयेषु शिक्षणं गुरवः दत्तवन्तः। परन्तु अधुना तत वैपरीत्यं भवति। अर्थनिति विभागस्याध्यापकः विश्वनाथः मिश्रः सभापरिचालनं कृतवान्। संस्कृतविभागप्रमुखः श्रीहरिश्चन्द्रः होता सभा प्रारम्भे वेदमन्त्रौच्चारणं कृतवान्। परिशिषे राजनितिविभागाध्यापकः श्रीमानसरञ्जन मिश्रः धन्यवादार्पणः कृतवान। छात्रः गुरुवन्दना गीतवत्यः।

---

# मातृदेव्यै महीरुहः इत्येतद् आधृत्य संस्थानपरिसरे वृक्षारोपणं विहितम्- विनयश्रीवास्तवः

(संस्कृतभवनम् लखनऊ) पर्यावरणस्य मातुर्विषये च प्रधानमन्त्रिणा मोदिना मनोगतम् उदीरितं यदि अहं प्रश्नः समुदेति यद् अस्मिन् जगति अमूल्यसम्बन्धः कः तर्हि उत्तरम् आयाति



श्माता एव तत्र परमाराध्या परमोत्कृष्टा सर्वाणि कष्टानि सोढ्वा पुत्रं पालयति पालयति स्नेहेन अभिसिञ्चति। यद्यपि तस्याः कार्तज्ञं कश्चिदपि विभर्तुं न शक्नोति । तथापि किं वयम् एतद् मातृदेव्यै महीरुहः इत्यभियाने एकस्य वृक्षस्य रोपणं कुर्याम!

प्रधानमन्त्रिणः इत्येतन्मनोवृत्तम् आधृत्य उत्तरप्रदेशसंस्कृतसंस्थानपरिसरे मान्यनिदेशकस्य विनयश्रीवास्तवस्य नेतृत्वे दिनेश मिश्रः, जगदानन्दझाः , राधाशर्मा, दिव्यरञ्जनः, चन्द्रकलाशाक्या, ऋषभपाठकः शान्तनुमिश्रः शिवमगुप्ता, दिव्यरञ्जनः धीरजमैठाणी, राधाशर्मा इत्येतान् समेत्य अन्ये कर्मचारिणश्च मातृदेव्यै महीरुहः इत्यभियाने वृक्षारोपणम् अकुर्वन्।

---

## प्रथमपुटस्य शेषभागः पाणिनिसंस्कृतविश्वविद्यालये गुरुपर्वस्य......

विश्वगुरुः अभवत। सनातनगुरुशिष्यपरम्परा सम्पूर्णे विश्वे आदर्शरूपा वर्त्तते। गुरवः छात्राणां कल्याणाय नैकोपायः कुर्वन्ति। शिष्येषु गुरुत्वं च जनयन्ति। विश्वविद्यालयस्य कुलसचिवः प्रो.दिलीपसोनीवर्यः गुरुपूर्णिमायाः शुभकामनाः कृतज्ञतां च निवेदितवान्। स्वागतभाषणं शिक्षाशास्त्रविभागप्रमुखा एवं समन्वयिका डॉ.पूजा उपाध्याय महोदया कृतवती। सहसंयोजनं डॉ.अनिलमुवेलमहोदयेन कृतम्। संचालनं डॉ.पूजागौरमहोदयया आभारज्ञापनञ्च डॉ. शंकरवेरा महोदयेन कृतम्। अस्मिन्नवसरे डॉ. अनुरुद्धत्रिपाठिवर्यः गुरुपादुकास्तोत्रस्य पाठं कृतवान्। कार्यक्रमे डॉ. अखिलेशकुमार द्विवेदी, डॉ. अजयराठी, अन्ये शिक्षकाः, छात्राः ,कर्मचारिणः च उपस्थिताः आसन्।

---

माननीय भागवतस्य कुलपतेश्च स्वागतं कृतम्। ताभिः ‘भारत संकीर्तनं’, ‘गीता नाट्य संवादः’ ‘गीता गौरव गाथा’ इत्येते कार्यक्रमाः प्रस्तुताः।

श्री भागवतेन भाषितं यत् जीवने स्वयं संघर्षः करणीयः। संघ कार्यक्रमे नारीभूमिका विषये तेनोक्तं यत् तासाम् अत्यंतं महत्वपूर्ण योगदानम्। मातृवर्गः संघस्य अप्रत्यक्षं कार्यकर्ता।

आचार्येण श्री वरखेड़िना स्व संदेशे कथितं कर्तव्येन प्रयत्नेन च संकल्पः स्वयं सिद्धयति ।कन्या गुरुकुल चोटीपुरा माध्यमेन ऋषि दयानंदस्य संकल्प यज्ञः पूर्णः जायते। एतद् भारतस्य पुनर्निर्माणे मूल स्तंभ रूपेण कार्यं कुरुते ।

# भारतवर्षस्य आर्यनिवासिनां वैशिष्ट्यम्

**डॉ. लक्ष्मीकान्तविमलः**

श्रीशंकरशिक्षायतनेन वैदिकशोधसंस्थानेन जुलाईमासस्य ३१ तमे दिनांके सायंकाले ५ वादनतः ७ वादनं पर्यन्तम् अन्तर्जालीयमाध्यमेन राष्ट्रिया संगोष्ठी समायोजिता। पण्डितमधुसूदनओझमहोदस्य इन्द्रविजयस्य द्वितीयाध्यायस्य विविधविषयं चाधारीकृत्य इयं राष्ट्रिया संगोष्ठी प्रवर्तिता।



पौरोहित्यविभागस्य आचार्याः श्रीलाल-बहादुर-शास्त्रि-राष्ट्रिय-संस्कृत विश्वविद्यालयस्य रामराजमहोदयाः सोमवल्लीम् आधारीकृत्य स्वव्याख्यानम् अकुर्वन्। पण्डित-ओझामहोदयानाम् इन्द्रविजजयनामके ग्रन्थे सोमवल्ल्याः अभिनवा व्याख्या अस्माभिः पठ्यते। हेमकूटो नाम पर्वतः अस्ति। तस्मिन् पर्वते चन्द्रः सोमवल्लीरूपो अस्ति। सोमेन यज्ञं भवति। यजस्य साधनं सोमः अस्ति। यदा देवैः सह असुरः युद्धे तत्सोमवल्लीं उत्क्षिपत्।

चन्द्रस्तु सोमवल्लीरूपो यो हेमकूटाद्रौ।
यज्ञैकसाधनं तद्देवानामुदखनन्नसुराः इन्द्रविजयः, पृ. २८७, कारिका१

अस्मिन् प्रसङ्गे यज्ञस्य महत्त्वं प्रतिपादितम्। देवताः यज्ञैः एव विविधां सिद्धिं प्राप्नुवन्तः। असुराः अपि यज्ञं कर्तुं प्रयतन्ते स्म। परन्तु ते असुरा यज्ञविधिं सम्यक् न जानन्ति स्म। अत एव यज्ञात् भूयमानां सिद्धिं ते असुराः न प्राप्नुवन्ति स्म।

यज्ञात् सिद्धीर्देवतानामनेका दृष्ट्वा यज्ञं कर्तुमैच्छन्नदेवाः।
किन्त्वस्मिंस्ते यज्ञविज्ञानशिक्षाशून्यः सिद्धिं नाप्नुवन् विध्यबोधात्।। तत्रैव, कारिका २

दिल्लीविश्वविद्यालयस्य हिन्दूमहाविद्यालयस्य संस्कृतविभागस्य आचार्याः विजयगर्गमहोदयाः देवयजनभूमिं स्वीकृत्य व्याख्यानं प्रदत्तवन्तः। तैः भणितं यत् स्वर्गशब्दस्य पर्यायः त्रिविष्टपम् अस्ति। वैदिकविज्ञाने त्रिलोकी प्रधानभूता अस्ति। विलोक्यां पृथ्वीलोकः भारतवर्ष, अन्तरिक्षं हैमवतवर्षे, द्यौः त्रिविष्टपम् अस्ति। अब पण्डित- ओझामहोदयः त्रिविष्टपस्य स्थाननिर्धारणं करोति। यत् उत्तरसमुद्रात् कुरुवर्षे पर्यन्तं त्रिविष्टपम् अस्ति। तत् त्रिविष्टपम् एव द्युलोकः अस्ति। यथा एका पृथ्वी अस्ति। तस्याः पृथिव्याः एकस्मिन् भागस्य राजा देवदत्तः, द्वितीयस्य भागस्य राजा कश्चित् अन्यः, तृतीयस्य भागस्य राजा कचित् भिन्नः। एकस्य भूपिण्डस्य राज्ञः भेदात् राज्यभेदं भवति। तथैव स्वर्गस्य एकस्य भागस्य राजा ब्रह्मा अस्ति। ब्रह्मा यस्य भागस्य राजा अस्ति, स भागः ब्रह्मणः विष्टपम्, द्वितीयस्य भागस्य राजा विष्णुः, स भागः विष्णुविष्टपम्, तृतीयस्य भागस्य राजा इन्द्रः, स भागः इन्द्रस्य विष्टपम्।

भारतवर्षं पृथ्वी हैमवतं वर्षमन्तरिक्षं स्यात् ।
उत्तरमब्धिं यावत् कुरुवर्षान्तं त्रिविष्टपं तु द्यौः।।
ब्रह्मण एकं विष्टपमपरं विष्णोस्तृतीयमिन्द्रस्य।
एभिस्त्रिभिरधिपतिभिः स्वर्गो लोकस्त्रिविष्टपं भवति।। तत्रैव पृ. २७१, कारिका १-२

श्रीरङ्ग-लक्ष्मी-आदर्श-संस्कृत-महाविद्यालयस्य, व्याकरणविभागस्य सहाचार्याः डॉ. रितेशकुमारपाण्डेयवर्याः सुरोत्पत्तिप्रसंगं मनसि निधाय स्वव्याख्यानं कृतवन्तः। तै कथितम् यत् यदा असुराः सोमरसं न प्राप्नुवन्तः। ते स्वराज्ञः वरुणस्य समीपं गत्वा प्रार्थयामासुः। वरुणः एकं मादक पदार्थ निर्माय देवताभ्यः प्रायच्छत् । वरुणस्य प्रयासेन निर्मीयमाणं मादकं पदार्थम् असुराः स्वीकृतवन्तः। ते असुराः कथितवन्तः यत् वयं सुरां पिबामः, इतिधिया सुरा शब्दः लोके मदिरार्थे प्रचलितः।

अप्राप्य सोममसुराः सोमविधं मादकं विधापयितुम्।
असुराधीशं वरुणं राजानं प्रार्थयामासुः ।।
वरुणस्ततः प्रयत्नाद् विनिर्ममे वारुणीं मदिराम्।
पास्यामस्त्वसुरानिति सुरामिमां नातश्चक्क्रुः।।

तत्रैव, पृ. २९४, कारिका १-२

विहारप्रदेशस्य महन्त-दर्शन- दास-महाविद्यालयस्य संस्कृतविभागस्य सहायकाचार्या डॉ. नीरजाकुमारी इन्द्रविजयग्रन्थस्य द्वितीयाध्यायस्य विषमम् अधिकृत्य व्याख्यानं प्रदत्तवती। सा कथितवती यत् भारतवर्षे ओङ्कारस्य महत्त्वम् अधिकम् अस्ति। भारतवर्षस्य कीदृशी महत्ता विद्यते। तद्विषये ग्रन्थकारः पण्डितमधुसूदनओझा लिखति यत् यत्र वेदः शास्त्रं वर्तते, येषां धर्मानुरूपेण चातुर्वण्यस्य विभागः अस्ति, गौ एवं पवित्रा गङ्गा आराध्या अस्ति। स देशः एव भारतवर्षम् अस्ति।

ओघ्ङ्कार एव येषामविशेषान्मन्त्र आराध्यः ।
येषां भिन्नमतानामप्यत्रास्त्येकबन्धुत्वम् ।।
येषां शास्त्रं वेदश्चातुर्वर्ण्य विभाजितो धर्मः।
धेनुर्गघ्ङ्गाऽऽराध्या तेषां देशोऽस्ति भारतं वर्षम्।।

तत्रैव, पृ. २५८, कारिका १-२

सूरतनगरे स्थितस्य श्रीक्ष्मीनारायणवेदपाठशालायाः आचार्याः डॉ. रवीन्द्रओझामहोदयाः स्वकीयैः स्वछात्रैः सह सस्वरं वैदिकमङ्गलाचरणं कृतवन्तः। कार्यक्रमस्य सञ्चालनं श्रीशंकरशिक्षायतनस्य वैदिकशोधसंस्थानस्य शोधाधिकारी डॉ. लक्ष्मीकान्तविमलः कृतवान् । अस्मिन् कार्यक्रमे विविधेभ्यः प्रान्तेभ्यः विश्वविद्यालस्य महाविद्यालस्य आचार्याः शोधच्छात्राः विषायानुरागिणश्च सोत्साहं भागं गृहीत्वा संगोष्ठीं सफलीचक्र।

# त्रिदिवसीय-अन्तराष्ट्रिय-आभासीय-सङ्गोष्ठी

कटक (डॉ.झरनारानीत्रिपाठी)। 29-31जुलाईमाह २०२४ बेबिनारद्वारा उत्कलप्रान्तस्य कटकजिल्लास्थित श्रीश्रीविश्वविद्यालयस्य कलासञ्चारप्राच्य अध्ययनसंकायेन सोमवासरे सस्कृतविभागपक्षतः जुलाईमासे-नवविंशतिदिनाङ्कतःत्रिंशत्दिनाङ्कपर्यन्तं "नवीनशिक्षानीतिःतथासंस्कृताधारितभारतस्यज्ञानव्यवस्थायाःपुनरुत्थानम्" इतिविषयमधिकृत्यत्रिदिवसीयअन्तराष्ट्रियसङ्गोष्ठीसमायोजिता । अस्य कार्यक्रमे उद्घाटनसत्रे श्री श्री विश्वविद्यालयस्यकार्यकारी कुलपतिः प्रो तेज प्रताप, महाभागैः.कोलकाता विश्वविद्यालयस्य संस्कृतविभागस्य प्रमुखः डॉ. कमलकिशोरमिश्रमहाभागाः, संस्कृतभाषायाः प्रयोगस्य प्रयोज्यत्वस्य च विषये अत्यन्तं चर्चां कृतवान्। अन्तर्राष्ट्रीय सङ्गोष्ठ्यांस संयोजक डॉ. झरनारानीत्रिपाठी इत्यनेन सफलतया ऐतिहासिकस्य आयोजनस्य आयोजनं कृतम्, यस्य अभिलेखः शैक्षणिक-इतिहासस्य पृष्ठेषु भविष्यति। स्वस्य असाधारणेन नेतृत्वकौशलेन, सुक्ष्मनियोजनेन च डॉ. झरनारानीत्रिपाठी विश्वस्य प्रख्यातविद्वान्, शोधकर्तृन्, छात्रान् च एकत्र आनयत्, आधुनिकशिक्षायां संस्कृतस्य महत्त्वस्य विषये विमर्शं कृतवती। भारतीयशिक्षाव्यवस्थायां संस्कृतस्य पुनरुत्थानस्य, पुनः समागमस्य च दृष्टिः अस्य उपक्रमस्य चालकशक्तिः अभवत् । एतस्यसङ्गोष्ठ्याः आयोजने तेषां सफलतायाः कारणात् शैक्षणिकसहकार्यस्य नूतनं मापदण्डं स्थापितं, संस्कृतस्य अध्ययनं प्रशंसनं च प्रवर्धयन्तः भविष्यत् उपक्रमानाम् मार्गः प्रशस्तः अस्ति।



स्वागतभाषणं प्रदातुं डॉ. शिल्पी मिश्रा व्याख्यातवती यत् विश्वविद्यालये शिक्षायाः नवीनतायाश्च प्रवर्धनार्थं ४० तः अधिकविषयान् पाठयति। समाजस्य बृहत्तरहिताय संस्कृतभाषा साहित्यं च अन्यभाषाभिः सह एकीकृत्य भवितव्यम् इति तस्य मतम् आसीत्।

मानवसंसाधनविकासकेन्द्रस्यनिर्देशिकाडॉ. विजयलक्ष्मीमहान्तिआसन् ।

श्रीश्रीविश्वविद्यालयस्यकोलकाताविश्वविद्यालयस्यचमानवसंसाधनविकासकेन्द्रस्यसंयुक्ताश्रयेणअस्यसङ्गोष्ठ्याम्आयोजनंकृतम्आसीत्। बालासोरतःसांसदः, संस्कृतभाषायाः प्रमुखः दूतः श्री प्रताप सारङ्गी इत्यनेन औपचारिकरूपेण उद्घाटितः । सः संस्कृतं विश्वस्य महतीं प्राचीनतमं च भाषां वर्णयित्वा आदर्शाध्यापकानाम् परिभाषां दत्तवान् । सः व्याख्यातवान् यत् यथा सत्शरीरनिर्माणाय सन्तुलितः आहारः आवश्यकः, तथैवमानसिकबुद्धिविकासाय उत्तमः मानसिकः बौद्धिकः च आहारः आवश्यकः। मानवजीवनस्य स्वरूपनिर्माणे शिक्षायाः कियत् महत्त्वपूर्णा भूमिका अस्ति इति सः विविधैः उदाहरणैः उदाहृतवान् । अस्माकं संस्कृतिः मातापितरौ, शिक्षकान्, राष्ट्रं च सर्वोच्चं मन्यते। अस्मान् 'मातृदेवो भावः, पितृदेवो भावः, आचार्यदेवो भावः च' इत्यादीनां उच्चविचारानाम् पाठं पाठयति ।

श्रीश्रीविश्वविद्यालयस्यमानवसंसाधनविकासकेन्द्रस्य निर्देशिका प्रो. डॉ. विजयलक्ष्मीमहन्ती छात्राणां संस्कृतभाषायाः प्रति रुचिः चिन्ता च विषये चर्चां कृतवती। डॉ. कमलकिशोरमिश्रःवर्तमानस्थितौ संस्कृतस्य लोकप्रियकरणविषये शोधप्रबन्धम् प्रस्तुतवान्।

त्रिदिवसीयस्य सङ्गोष्ठ्यांमध्ये विभिन्नसंस्थानां प्रख्यातवक्तृभिः भारतीयज्ञानव्यवस्थायाः विषये, नूतनशिक्षानीतेः कृते तस्याः प्रासंगिकतायाः विषये च स्वविचाराः प्रदत्ताः। कार्यक्रमस्य प्रथमदिने विश्वभारती शान्तिनिकेतन प्रो. अरुण रंजन मिश्रा 'भारतीय ज्ञान-प्रणाल्यां प्राकृतिक-विज्ञानस्य आविष्कारः' इति विषये भाषितवान्, ततः प्रो. गोपबन्धुमिश्रः 'नवीनशिक्षानीति २०२० मध्ये संस्कृतस्य महत्त्वम्' इति चर्चां कृतवान् । इलाहाबाद विश्वविद्यालय प्रो. अनिल प्रताप गिरि, "योगमनोविज्ञानस्य आध्यात्मिक शरीररचनाशास्त्रस्य च आलोके भारतीयज्ञानव्यवस्था"इत्यनेनएतस्यचर्चाकृतं आसीत् ।

द्वितीयदिने दक्षिण आफ्रिकादेशस्य अन्तर्राष्ट्रीयसंस्कृताकादमीयाः डॉ. मुरलीधरपाण्डा 'पूर्वपाश्चात्यदर्शने धर्मधर्मस्य मूलभूतसंकल्पना' इति विषये व्याख्यानं दत्तवान्। श्री शंकराचार्य संस्कृत विश्वविद्यालयस्य कुलपति प्रो. के.के. गीता कुमारी 'भारतीय ज्ञानव्यवस्थायाः अवलोकनम्' इति विषये वदति स्म।

अन्तिमदिने केन्द्रीयसंस्कृतविश्वविद्यालयस्य नवीदिल्लीनगरस्य कुलपतिः प्रो. श्रीनिवास वर्खेडि "नवीनशिक्षानीतिः2020भविष्यवादी परिप्रेक्ष्य" व्याख्यानं दत्तवान्। डॉ. ननिहालगौतम, हरिसिंह गौर विश्वविद्यालयमध्यप्रदेशस्य सहायकाचार्य "राष्ट्रियशिक्षानीति २०२४, भारतीय ज्ञानपरम्परायाः पुनरुत्थानस्य सम्भावना" तथा प्रो. कलकत्ता विश्वविद्यालयस्य मौ. दासगुप्ता 'भारतीयज्ञानव्यवस्थायाः स्रोतः इति वेदाङ्गम्' इति चर्चा कृतवती।

समापनसत्रेश्रीश्रीविश्वविद्यालयस्यकलासञ्चारप्राच्यअध्ययनविभागप्रमुखःडॉ. कमलाप्रसादमहापात्रःतथाडॉ. कमलकिशोरमिश्रः कोलकाताविश्व-विद्यालयविभागप्रमुखः आसन्। अन्तर्राष्ट्रीयसङ्गोष्ठ्यांछात्रैः शोध-प्रस्तुतिःअपिअभवत्, येनसःसमृद्धःविविधःचशिक्षण-अनुभवः अभवत्तथाचसह-संयोजिकाडॉ. गायत्रीरथः, सह-संयोजकःडॉ. प्रशांत-कुमार-दाश-मुखः संस्कृतविषयेस्वविचारंदतवान्।

## पाठकानां कृते सूचना

**कृपया 'संस्कृत-संवादः' पाक्षिकवार्तापत्रस्य ग्राहकत्वं स्वीकर्तुम् आजीवनं सदस्यताशुल्कः- रु. २५००/-, पञ्चवार्षिकशुल्कः रु. ११००/- (संस्थादीनां कृते) द्विवार्षिकशुल्कः रु.४८०/- (व्यक्तीनां कृते) मनिऑर्डरः, चैकः, ड्राफ्टः, इत्यनेन 'संस्कृत-संवाद' इतिनाम्नः सम्पादकीयकार्यालये प्रेषयेयुः। अथवा अस्यां वित्तकोषसंख्यायां (A/C) शुल्कराशिः प्रेषयितुं शक्यते। वित्तकोषविवरणम्**

**Sanskrit samvad,**

**Current A/C No. 224902000000142,
Indian Overseas Bank, Yamuna Vihar,
Delhi-110053
IFC Code- IOBA0002249**

# 'वेदरक्षाङ्गभूतानि ध्वनिस्वरसङ्गीतानि

## प्रासङ्गिकता समस्या समाधानं सम्भावना च

-ऋषिराजपाठकः

प्राक्कालादेव नः परम्परायां विश्वसाहित्ये समादृतानां वेदानां रक्षार्थं विविधाः प्रकल्पाः प्रकल्पिताः। शिक्षा-व्याकरण-कल्प-निरुक्त-छ-दोज्यौतिषादिवेदाङ्गानां वेदाङ्गतापि वेदरक्षासिद्धचयर्थमेव। पुनश्च पदक्रमजटाम्यलाशिखारेखाप्वज-दण्डरथयनादिप्रकृतिविक्तिपाठकल्पनापि प्रकल्पिता प्रसृत्ता च वेदरक्षायै। अत्यन्तं समुद्धाषि परम्परेयमस्मदीया स्वम्प्रतिके युगे शैथिल्यमुपगता। सम्प्रति व्याकरणादिवेदाङ्गानि स्वतन्त्रविषयत्वेन स्वसत्तां दधति न तेषां वेदा-प्रति तथाङ्गता यथा चर्चितं परम्परायाम्। अद्यत्वे व्याकरणे प्रायेण वैदिकप्रकरणापेक्षया नैकसतान्वितानां शिक्षाग्रन्धानां सङ्ख्याधिकत्वान्मतवैभिन्याच्च पाठ्यक्रमे प्रायेण कल्पसूत्राणाम् असनद्धतया यज्ञानुष्ठानादीनामाभावाच्च निरुक्तस्य कंवलं चयनितांशचाधनपरम्परया छन्दः शास्वस्य प्रायेण काव्यहेतुत्वादेव मूहूर्तपन्चाङ्गादिषु चरितार्थस्य कर्मकाण्डसहचरस्य ज्यौतिषस्थ चाजीविकामात्रसाधनत्वात् पुनश्च शनैः शनैः श्रुतिपरम्पराया अपि हासात् पदक्रमप्रभृतिप्रघतिविक्तिपाठपरम्परावा अभावान्नो बेदानामुपचौव न तु रक्षा। अतोऽत्र विचारणीयः कोऽप्येवविधः प्रकारो येन वेदरक्षाप्रसङ्गः प्रवृत्तः स्यादाधुनिके युगे। प्राचीनार्वाचीनविधिना विचार्यत भोद् वक्तुं शक्यं यत्सङ्गीतं शिक्षादिषु प्रतिपादित उच्चारणात्मको वर्णस्यतिः उरातादिवैदिकस्वराश्च बेदरक्षाङ्गघ्भूतानि। अत इहेमानि चर्च्जन्ते साम्प्रतिकदूमा। वेदरक्षाकाङ्क्षया बेदधाकल्पोऽयं द्विधावगर्नु

1. उपलब्ध श्रुतिपरम्परासंरक्षणम्
2. वेदानां सम्यगर्भावधोधनम्

इह सङ्गीतं ध्वनिश्च महदुपयोगिनी श्रुतिपरम्परा संरक्षाणार्थम् उदद्यात्तादिस्वराश्चार्थदृशा।

**संगीतस्याङ्गता वेदरक्षायै-**

साम्प्रतिक्यां श्रुतिपरम्परायणं यदुच्चारणात्मकं तरू वर्णरूपं श्रूयते तत्र बहुशः सङ्गीतत्त्वं प्रत्यक्षम्। ऋक्सामसंहितयोः सामान्यतया सामगानेषु च विशेषतया सद्भीतस्वगणां हृदयहारिणी श्रुतिः कर्णगोचरीभवति। परं समस्मेयमस्ति यद् ये वेदपालिनस्ते प्रायेण सङ्कीर्त न विनित। अपि च ये सट्टीतज्ञास्ते नेदपाठपरम्परया न परिचिताः अतो नेदोच्चारपोऽपि वैरिकाः सङ्गीततरर्ष राङ्गीकुवन्ति। अथ चौतदुराग्रहाम्हणास्वानां मेदपाठिनां समर्थ नितानामपरिहार्य सङ्गीतदृशा सुतिपरम्परा समीक्षणम्। अनेन विसङ्गीतशास्रतिहासकाराणाज्य कृतं परम्परायाः प्रसूता प्रकृताच चीनकालाम्बत सावत् प्रवहमानात्यन्तं प्रामाणिकी योगा दृष्टिनानि तम्मानि जनहि पुररकरिष्यति तथा सङ्गीतमय तद्विधनोन वैदानों श्रुतिपरम्पराया नाती सत्संरक्षणसाधन सङ्गीत भक्तुं शक्यत आधुनिकदृशाः एतच्छुतिपरम्परासंरक्षणार्थ सगुपलभ्यमान्वैदिकपाठानां दृश्ययावन्यङ्कन कर्तव्यम्। सति ध्वन्पङ्कने सङ्गीतशास्त्रिभिध्वन्यङ्कितं सङ्गीतं समीक्ष्य चहु किमपि सङ्गीतशास्त्रोपयोगि दातं तत्त्वं समुन्नीलयितुं शक्यम्। एवं सङ्गीवदृशा वैदिक अतिपरम्परासंरक्षणं भवितुं शक्यते गडू वेदानां विश्वसारीर्य क्रियात्मक महत्वमषि प्रस्तोष्यति।

**ध्वनेरङ्गता वेदरक्षायै-**

ध्वनिशब्दव्यवहार इहोच्चारितस्थ वर्णरूपस्य कृते कृतः। वेदस्य यदुच्चारणात्मक सर्वस्वरूप तद् ध्वनिः। शिक्षाव्याकरणप्रातिशाख्यप्रभृतिषु ग्रन्थेषु ध्वनेर्निरूपणं विविधदृष्ट्या कृतम्। विशिष्य प्रतिशाखं प्रातिशाख्यादिषु ध्वनिचर्चा प्राप्यते। तत्रापि तस्योच्चारणपक्षमधिकृत्य विवेचनं प्रस्तावितम्। अतो मन्त्रोच्चारणेऽतिसावधानेन भाव्यम् यतो हि- **मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह** इतीह वर्णतो इत्यस्याभिप्रायोऽप्ययमेव। एवं नः परम्परायां लभ्यते शुद्धोच्चारणाग्रहदर्शनम्। यद्यपि व्याकरणदृशा ध्वनीनामुच्चारणप्रकारः सिद्ध एवं पुनरपि वेदशाखाविशेषे तेषामुच्चारणे भेददर्शनं प्राप्यते, एतस्य च भेददर्शनस्य विधानं शिक्षादिग्रन्थेषु दृश्यते। परं तत्रात्यन्तं वैषम्यं वर्तते। साम्प्रतिकैः शुक्लयजुःपाठिभिः षकारः खकारत्वेनोच्चार्यते परं टवर्गसहितः षकारः खकारत्वेन नोच्चार्यते। स तु षकार एव। पुनश्च शषसहोपरिगतस्य रेफस्योच्चारणं शुक्लयजुषि माध्यन्दिन्यां 'रे'-श्रुतित्वेन क्रियते, पुनः साम्नः कौथुमशाखायामेतस्यैव 'रि'-श्रुतित्वेन सम्भवति समुच्चारणम् अथ च शुक्लयजुषो माध्यन्दिन्यां पादान्तस्य मकारस्य म्मश्रुतिः, साम्नः कौथुमीयां मन्त्रान्तस्य मकारस्य च म्मश्रुतिर्भवति। यजुषि च सत्यपि संयोगपरके वर्णसङ्घ्याते बलाघाते क्षिप्रतयोच्चकार्यते संयुक्तवर्णः, अनकारमकारसंयोगे। एवं श्रुतिपरम्परायां ध्वनिप्रपञ्चो बहुधा श्रूयते। अतो नितान्तमपरिहार्यं शिक्षादिचर्चितस्य ध्वनिस्वरूपस्य साम्प्रतिकश्रुतिपरम्परायां तुलनात्मकं समीक्षणम्। सत्यपि वैधम्ये तत्कारणचर्चाप्रसङ्गोऽप्यतीव महत्त्वं विभर्ति भाषाविज्ञानाङ्गस्य ध्वनिशास्त्रस्य सिद्धान्तक्रियात्मकव्याख्यानार्थम्। अनेन ध्वनिविकासपरम्पराया अपि ज्ञानं सम्भविष्यति साम्नः कौथुमराणायनीयशाखयोः क्रमशः 'हाउ हावु' चेति पाठान्तरम् इह भेदोऽयं यद्यपि भौगोलिकप्रभावजः तथापि व्याकरणसम्मतमुकारवकारयोः सम्बन्धं दर्शयति। एवं कृत्वा वेदानां साम्प्रतं प्रचलितायाः परम्परायाः प्रतिशाखं ध्वनिस्वरूपं समीक्ष्य एकस्याः शाखायाः शैलीभेदमाधृत्य शाखान्तरस्य वा तुलनात्मकं ध्वनिप्रपञ्चं निरूप्य भाषावैज्ञानिकं किमपि ज्ञानवर्धकं तत्त्वं समुन्मीलयितुं शक्यम्। एवं भाषाविज्ञानान्तर्गतं ध्वनिशास्त्रं शिक्षादिचर्चितञ्च ध्वनिविषयं लक्ष्यीकृत्य श्रुतिपरम्परायाः संरक्षणे प्रबलस्तर्कः प्राप्यते। अतो ध्वनेरपि वेदाङ्गता प्रत्यक्षसिद्धा।

**स्वराणामङ्गता वेदानां सम्यगर्थाव-बोधनार्थम-**

इह उदात्तानुदात्तस्वरितप्रभूभृतयों वैदिकाः स्वरा एक ग्राह्याः। यद्यपि एतेषामभिव्यञ्जनं श्रुतिरूपमेव परमेषामतीव महत्त्व वेदार्थावोधनप्रसङ्गे। महाभाष्ये पस्पशाह्निके स्थूलपृषतीत्युदाहरणमुदाहृत्य पतञ्जलिना स्वरमहत्त्वं प्रदर्शितम्। इह समासभेदादर्थभेदः, समासभेदश्च स्वरभेदात् सिद्धयति। ऋग्वेदभाष्यकारेणापि वेङ्कटमाधवेन स्वराणामर्थदृशा महत्त्वमुद्घोषितम्-

**अन्धकारे दीपिकाभिर्गच्छन्न स्खलति क्वचित्।**
**एवं स्वरैः प्रणीतानां भवन्त्यर्थाः स्फुटा इति॥**

(स्वरानुक्रमणी 1/8)

अनेनैव विलिखतं यत् नामाख्याते विभागश्च स्वरादेवावगम्यते। वैदिकस्वरमीमांसा, युधिष्ठिरमीमांसकः, पृ.94)

यथा स कर्ता स कर्ता। इहाद्युदात्तः कर्ता तृन्नतत्वान्नाम अन्तोदात्तश्च कर्ता आख्यातपदम्। एवमेव शबरस्वामी भर्तृहरिः

विश्वनाथश्च स्वराणामर्थबोधकतां व्याख्यातवन्तः।

निरुक्तकारणेन यास्केन विलिखितं यद्-

**तीव्रार्थतरमुदात्तम्, अल्पीयोऽर्थतरमनुदात्तम्।** (नि. 4/25)

अर्थात् अनुदात्तापेक्षयोदात्तस्यार्थः प्राधान्यं भजते।

एवमेव समासेऽपि यस्य पदस्योदात्तत्वं भवति तस्यैव प्राधान्यं भवति। वेङ्कटमाधवानुसारम्-

**तत्रोत्तरपदार्थस्य प्राधान्यं यत्र वर्तते।**
**उदात्तस्तत्र भवति.............................।**
**यदि स्वरः पूर्वपदे तदर्थः प्रस्फुटो भवेत् ।**
**सर्वेष्वेव समासेषु यत्र यत्र स्वरो भवेत्।**
**काशं कुशं वावलम्ब्य स्वरं तं स्थापयेदिति॥**

(स्वरानुक्रमणी 1/3/2, 3, 22)

वाक्येऽप्येवमेव ज्ञेयम् वाक्यप्रसङ्गे उद्घ्धृतमेतद् वचनं युधिष्ठिरमीमांसकंन वैदिकस्वरमीमांसायां (पृ. 67)।

वेङ्कटमाधवानुसारम्-

**एवं पदे समासे च यत्रोदात्तो व्यवस्थितः।**
**वर्णे पदे वा तत्रापि काकुरस्तीति निश्चयः॥**

(स्वरानुक्रमणी 1/1/21)

वेङ्कटमाधवक्ताद् ऋग्वेदबृहद्भाष्यात्सङ्कघलितायाः शब्दसूच्याः प्रस्तूयन्ते केचन शब्दाः, यत्र स्वरभेदादर्थभेदः

प्रत्यक्ष एव-

| | |
|---|---|
| शब्दः | अर्थः |
| जठरः | अग्निः |
| जठरः | उदरवचनः |
| यमः | येन गच्छति |
| यमः | वैवस्वतः |
| सत्यम् | ऋतार्थ |
| सत्यम् | दारिद्रये |
| ज्येष्ठः | प्रशस्यः |
| ज्येष्ठः | वयसा ज्येष्ठः |
| सुकृतम् | निष्ठान्तरम् |
| सुकृतम् | क्विवन्तम् |

सुकृतम् भवे निष्ठान्तं बहुव्रीहौ

भ्रातृव्यस्य वधाय '(माध्यन्दिनसंहिता 1/18), नतस्य प्रतिमा अस्ति (माध्यं.सं.32/2) इन्द्रशत्रुरित्यादिभिरुदाहरणैः सिद्धमेव स्वरभेदादर्थभेदोऽर्थनिधरिणञ्च।

स्वराणामुक्तप्रपञ्चं परिलक्ष्य प्रतीयते यद् भाषाविज्ञानान्तर्गतमर्थविज्ञानमपि स्वराणामर्थव्यवस्थामेवाश्रित्य यास्कप्रसूतां स्वस्वरमूलकतां भजते। अतो वैदिकभाष्यानुशीलनं कर्तव्यमेतेषां स्वराणामर्थवत्तां समाश्रित्य येन वेदार्थः स्फुटः स्यात्। एवं सङ्गीतम्, ध्वनिशास्त्रम्, स्वरशास्त्रञ्च वेदाङ्गतां भजन्तो। एतेषामाधुनिकदृशाऽनुशीलनमपरिहार्यम्। यद्युक्तदृशा वेदरक्षाप्रकल्पः प्रवृत्तः स्यात्तदा सङ्गीतशास्त्रस्य भाषाविज्ञानस्व च कृते वेदाः क्रियात्मकविधिना आधारत्वेन प्रतिष्ठां प्राप्स्यन्ति।

# संस्कृतेः संरक्षणाय संस्कृतनीतिशास्त्राणां पाठ्यक्रमे समावेशनम् आवश्यकम् - प्रो.बालकृष्णशर्मा

डॉ.दिनेश चौबे, उज्जयिनी

भारतीयज्ञानपरम्परा संस्कृतं च राष्ट्रियशिक्षानीति २०२० परिप्रेक्ष्ये केन्द्रितायाः द्विदिवसात्मिकायाः राष्ट्रियकार्यशालायाः समापनं जातम्। उज्जयिनीस्थ महर्षिपाणिनिसंस्कृतवैदिक विश्वविद्यालये मध्यप्रदेशसर्वकारस्य उच्चशिक्षाविभागस्य सहकारेण आयोजितायाः राष्ट्रिय कार्यशालायाः 03 जुलाई 2024 तमे दिनाङ्के समारोपः जातः। कार्यशालायां देशस्य




अनेकराज्येभ्यः समागतेभ्यः विषयविशेषज्ञैः पाठ्यक्रमस्य अद्यतनीकरणं विचारविमर्शः च कृताः।

समापनसमारोहस्य मुख्यातिथिः उज्जयिनीस्थ विक्रम विश्वविद्यालयस्य पूर्वकुलपतिः प्रो. बालकृष्णशर्ममहोदयः आसीत्। महोदयेनोक्तं यत् संस्कृतपरमवैज्ञानिका भाषा अस्ति इति सिद्धम् एव संस्कृतनीतिशास्त्राणां पाठ्यक्रमे समावेशनं कृत्वा अध्यापनस्य आवश्यकता विद्यते। तदा एव अस्माकं संस्कृतिः, संस्कारः, शिक्षामूल्यानि च संरक्षितानि भविष्यन्ति। सारस्वतातिथिरूपेण उपस्थितः प्रो.रमाकांतपाण्डेयवर्यः केन्द्रीयसंस्कृतविश्वविद्यालयस्य भोपालपरिसरस्य निदेशकः स्ववक्तव्ये उक्तवान् यत् नवीनशिक्षानीतिः भारतीयज्ञानपरंपरां पूर्णरूपेण प्रतिष्ठापयितुम् अवसरान् कल्पयति। यस्यां संस्कृतस्य महत्त्वं विशेषरूपेण विद्यते। भारतीयज्ञानपरम्परा संस्कृतेन प्रेरिता अस्ति। साम्प्रतिके प्रौद्योगिक्याः च युगे संस्कृतस्य अध्यापनार्थं नाना प्रकल्पाः उपलब्धाः सन्ति। अनेन संस्कृतस्य प्रभावः सर्वत्र दृश्यते। विशिष्टातिथिमहोदयेन विक्रमविश्वविद्यालयस्य कुलानुशासकेन प्रो.शैलेन्द्रकुमारशर्मेनोक्तं यत् भारतीयज्ञानपरम्परायाः विषये सम्पूर्णे विश्वे आदरम् अस्ति। सर्वेपि विज्ञाः नतमस्तकाः सन्ति। संस्कृते किं न वर्तते सर्वं संस्कृते प्रतिष्ठितम्। अस्माकं युवानः संस्कृतभाषायाः अध्ययनम् अनिवार्यरूपेण करिष्यन्ति। तदा एव भारतीयज्ञानपरम्परायाः मूल्यानां प्रचारो प्रसारश्च कर्तुं शक्यते। सभाध्यक्षः माननीयः कुलगुरुः प्रो.विजयकुमारसीजीवर्यः उक्तवान् यत् संस्कृतभाषायां ज्ञानस्य सर्वेऽपि पक्षाः सन्निहिताः सन्ति। सर्वाङ्गव्यक्तित्वविकासस्य अवधारण भारतीयदर्शने महत्त्वपूर्णा अस्ति। पाणिनिसंस्कृतविश्वविद्यालयः देशस्य प्रथमः संस्कृतविश्वविद्यालयः अस्ति यत्र राष्ट्रियशिक्षानीतिः २०२० इत्यनुसारं पाठ्यक्रमाः आरब्धाः। विश्वविद्यालयः भारतीयमूल्यानां शिक्षायां समावेशं कर्तुं, संस्कृतमाध्यमेन संस्कृतस्य अध्यापनार्थं च प्रयत्नशीलः अस्ति। कार्यक्रमस्य आदौ मौखिकस्वागतं संयोजकेन डॉ. तुलसीदासपरौहामहोदयेन, प्रतिवेदनञ्च डॉ. शुभमशर्ममहोदयेन प्रस्तुतम् अस्मिन् अवसरे विश्वविद्यालयपरिचायिकायाः विमोचनमपि जातम्।

कार्यशालायाः तकनीकिसत्रेषु देशस्य मान्यविद्वांसः शोधपत्राणि, व्याख्यानानि च दत्तवन्तः। कार्यशालायां प्रो. शीलानायकः, छतरपुरम्, प्रो.विष्णुपदमहापात्रः, देहली, डॉ. नौनिहालगौतमः, सागरम् ,प्रो.जे.एन. त्रिपाठी, प्रो.एच.पी.दीक्षितः, डॉ. एच.आर.रैदासः, भोपालम् डॉ. योगेशत्रिवेदी, वडोदरा, इत्यादयाः प्रमुखाः आसन्।

संचालनं डॉ. पूजा उपाध्याय, डॉ. उपेन्द्रभार्गवेन आभारसमर्पणञ्च कुलसचिवेन प्रो.दिलीपसोनीमहोदयेन विहितम्। कल्याणमन्त्रेण सह सभा विसर्जिता जाता आसीत्।

# नमोऽस्तु गुरवे मम

(गुरुपूर्णिमामुपलक्ष्य)



-महाचार्य्यःमनतोषःभट्टाचार्यः

अद्य प्रातर्न भवति यथा ह्यः परह्यः परह्यो
वारे प्रातस्स्म भवति धरां चाद्य वारो विशिष्टः।
प्रातर्नत्वा स च दिनकरो यं ह्युदेति प्रवीणस्-
तस्मै युक्तो भवति गुरवे पालनीयो दिनोऽयम्।।१।।
प्रातः स्नातं भजननिरतं देवनद्यास्तटे तं
दृष्ट्वाचार्यं नमति मिहिरश्चोदयाद्रिं प्रभाते।
चाप्याचार्यो ह्युदितरवयेऽर्घ्यं प्रदत्ते स सूर्यो
नीत्याचार्यं गुरुरपि रविं नौत्यनन्यो दिनोऽयम्।।२।।
कस्मान्नार्कः प्रणमति गुरुं येन रात्रिन्दिवं वै
शिष्याणां यन्मनसि च तमोऽज्ञानरूपं प्रगाढम्।
ज्ञानालोकैर्हरति सहसा केवलस्सोऽरूणस्तु
क्षित्यां ध्वान्तं हरति दिवसो नो रजन्यां क्षमोऽस्ति।।३।।
कस्मान्नार्कः प्रणमति गुरुं किरणैस्तस्य तिग्मैर्
भूम्यां भानोर्भवति सकलः पीडितो दग्धदेहः।
प्राचार्यस्य प्रियतमगुरोर्ज्ञानरश्मिः प्रशान्तस्-
सर्वं व्याप्य प्रसरति जनो दीपितो ज्ञानदीपैः।।४।।
कस्मान्नार्कः प्रणमति गुरुं सोऽरुणस्सर्वदैव
भूमौ नद्या ह्यथ जलनिधेः पुष्करिण्या रसं हा।
निःशेषं वै पिबति सलिलं नीरसा याति पृथ्वी
सर्वेभ्योऽमी ददति गुरवो ज्ञो रसं ज्ञानजन्यम्।।५।।
कस्मान्नार्कः प्रणमति गुरुं यानमारुह्य नित्यं
सप्ताश्वैस्तैर्ह्युतिगतिमयं वाहितञ्चौकचक्रम्।
आससारं भ्रमति किरणं सुष्ठु दत्ते जनेभ्यः
प्राचार्योऽयं भ्रमति ददते ज्ञानरश्मिं पदातिः।।६।।
प्रातस्सायं भजति भजको मध्यभागे दिनेऽर्क
प्राचार्यन्तु प्रतिदिनमहो सर्वदा निर्विशेषम्।
प्रह्वास्सर्वेऽभजकभजकास्तं नमन्ति प्रणम्यं
तस्मात् सोऽर्कश्शुभगुरुदिने तं प्रणम्य ह्युदेति।।७।।
कस्मान्नार्कः प्रणमति गुरुं चन्द्रमा ज्ञश्च भौमस्-
स्वर्भानुर्वै कविरथ गुरुः केतवस्तञ्च सूर्यम्।
आवर्त्तन्ते गमनपदवीं पर्वतस्तस्य विन्ध्यो
यावद्रुन्धे स्म गतिरहितस्साध्वगस्त्यं गुरुं सः।।८।।
दृष्ट्वा विन्ध्यस्स नमति यदा सूर्यदेवोऽथ मार्गं
लब्ध्वाकाशे प्रचलति पुनर्बाधहीनो निरीक्ष्य।
विन्ध्यो नम्रस्स भवति गुरौ माननीये ह्यगस्त्ये
सूर्यस्तावन्नमति भजते तं गुरुं सर्वदैव।।९।।((युग्मकम्))।।
कस्मान्नार्कः प्रणमति गुरुं सत्यमेतद्विदित्वा
सान्निध्यञ्चेद्भवति मरणं रश्मिभिस्तस्य तीव्रैः।
मृत्युर्नो वा ज्वलनमधिकं स्यात्तथादर्शनञ्चेन्-
नालोकं हा क इह लभते जीवनञ्चान्धकं स्यात्।।१०।।
लब्ध्वा शिष्यं यदि हि सहसालिङ्गतीष्टं गुरुस्स
स्निग्धस्पर्शो जनयति सुखं नास्ति पीडा न कष्टम्।
दूरं याति ज्वलनमचिरान्मृत्युभीतिः परास्ता
दृष्ट्वा नापि प्रियतमगुरुं साहचर्यं गुरोर्वै।।११।।
नित्यं शिष्योऽनुभवति सुखं जीवनं प्रोज्ज्वलं स्यात्
तस्माच्चार्कः प्रणमति गुरुं वासरेऽस्मिन् प्रभाते।
यत्त्वं भर्गो भजसि सवितुः प्रत्यहं तद्वरेण्यं
त्वाञ्चावश्यं प्रसरति सुधीश्चेद्गुरुं त्वं नमेर्वै।।१२।।((सन्दानितकम्))।।
कस्मान्नार्कः प्रणमति गुरुं यादवो यावदीशः
कृष्णस्तुष्ट्यै मृतगुरुसुतं मृत्युलोकं स नेतुम्।
गत्वा शीघ्रं स्वगुरुतनयं सुष्ठु चोद्धृत्य तस्मै
प्राचार्याय प्रवणतशिरा दत्तवान् दक्षिणार्थम्।।१३।।
एवं दृष्ट्वा स च दिनकरः किं न कुर्याद्यथार्थं
यावत् कृष्णस्त्रिभुवनपतिः प्रीतयेऽसौ गुरोश्च।
चक्रेऽसाध्यं तदितरजनैर्मृत्युलोकात् प्रयातं
पुत्रं नीत्वा सपदि गुरवे दानमर्कः सतर्कः।।१४।।((युग्मकम्))।।
सूर्यश्चेत्तं प्रणमति गुरुं पुण्यवारे गुरूणां
को वा सौरो भजति न गुरुं येन नारायणोऽसौ।
ध्येयो नित्यं वसति सवितुर्मण्डले मध्यभागे
श्रेष्ठं यो वा समनुकुरुते निर्मला तस्य कीर्तिः।।१५।।
शिष्योऽमन्दो भजति च गुरुं यो ध्रुवञ्चेहकाले
यो वाधीते सुखमथ वसन् पादपद्मस्य मूले।
प्राचार्याणां पठितविषयस्सुस्थिरस्तस्य चित्ते
शिष्यायास्मै स च गुरुवरो निश्चितं यच्छतीष्टम्।।१६।।
राहुग्रस्तस्स च दिनकरश्चेदमायां न भीतो
जानन्मुक्तिर्भवति सहसा यत्र शिष्ये सहायः।
सर्वद्रष्टा भवति च गुरुस्तेन वारे गुरूणां
युष्माकञ्चेन्नतिरथ गुरौ भक्तितस्स्यात मुक्ता।।१७।।
मुक्तिर्नो ते भवति सुलभा बन्धनं निश्चितञ्चेत्
पापाचारिन् सपदि भजतात् पादपद्मं गुरोस्त्वम्।
बद्धश्चेत्त्वं भवसि गुरुणा वासरेऽस्मिन् गुरोस्त्यान्-
मुक्तो बद्धोऽप्यसि चलति चाघं गुरौ त्वत्कृतं द्राक्।।१८।।
शिष्ये रुष्टे भवति स गुरू रक्षकस्तं विपन्नं
रुष्टे त्रातुं भवति न गुरौ कोऽपि किञ्चित् पृथिव्याम्।
वित्तैस्तुष्टा भवति वनिता वन्दनैर्देवसङ्घाः
शास्ता तुष्टो यदि गुरुदिने नौति कश्चिद्विनम्रः।।१९।।
दासोऽहन्ते ह्यपि मम गुरो निश्चितं देहबुद्ध्या
पुत्रस्स्यान्ते ह्यपि च भगवञ्जीवबुद्ध्या त्वदंशः।
जानेऽहं चास्म्यपि मम गुरो चात्मबुद्ध्या त्वमेव
दीनस्तेऽहं यदि न च लभे चाशिषं जन्मना किम्।।२०।।
ब्रह्मा विष्णुर्ननु पशुपतिर्देहधारी नरोऽयं
सर्वा विद्यां विमलचरितो लोकमान्यस्तु शास्ता।
शिष्येभ्यो ज्ञस्सपदि ददते निर्द्विधो हृष्टचित्तस्-
तस्मै नम्रश्शुभगुरुदिने मे नमो मे नमोऽस्तु।।२१।।

-समाप्तम्-

# भिक्षुकवराष्टकम्!



-डॉ. अरविन्दकुमारतिवारी

न गेहः कैलासो न च धनमहो भस्मभवनं
सुपत्नी चापर्णा तनययुगलं नित्यवशगम्।
न पीयूषाकाङ्क्षा भवति परमद्यापि सततं
कपाली योगीशश्चरति भुवनं भिक्षुकवरः।। १
न हारो ग्रीवायां सरति नितरां फुत्कृतिरतो
महाव्यालो भूषा हिमगिरिसुतायाः पतिगले।
महाहिः श्रीमन्त्रं जपति हरमद्यापि भगवान्
कपाली योगीशश्चरति भुवनं भिक्षुकवरः ।। २
अमन्दं सानन्दं व्रजति भुवि नन्दी गिरिगृहे
वहन् पृष्ठे शम्भुं गणपतिकुमारौ हिमसुताम्।
डमट्शब्दं शृण्वन् भवति मुदितः सत्वरमहो
कपाली योगीशश्चरति भुवनं भिक्षुकवरः ।। ३
ललाटे बालोऽयं विलसति शशी शीतबहुलो
ज्वलत्क्रोधावेगं हरति लघुरूपोऽपि विपुलः।
प्रकाशं तन्वानः पथि वितनुते दर्शनमतः
कपाली योगीशश्चरति भुवनं भिक्षुकवरः ।। ४
जटावासे गङ्गा भ्रमति कुपिता शीतसलिला
सलीलं शर्वाङ्गे भ्रमति ललनावत् प्रमुदिता।
महाग्रीष्मे शम्भोर्वपुषि रमते शीतलजला
कपाली योगीशश्चरति भुवनं भिक्षुकवरः ।। ५
जगन्माता भोज्यं प्रतिदिनमियं देवजननी
विशालाक्षी दत्ते भुवनजनयित्री स्वरुचितम्।
यतो लोकः स्वस्थः सरति निजकार्येष्वविरतं
कपाली योगीशश्चरति भुवनं भिक्षुकवरः।। ६
त्रिशूलं तापानां दहति परिणामं ध्रुवमहो
नता श्रद्धाभावैर्भजति जनतेयं शुभशिवम्।
नमोवाचा मुग्धस्त्रिभुवनपतिश्श्रावणदिने
कपाली योगीशश्चरति भुवनं भिक्षुकवरः ।। ७
तृतीयं सन्नेत्रं हरति कलुषं मे हृदि सृतं
दहत् सर्वं पापं नयति हरलोकं प्रतिजनम्।
विजानन्मां बालं कुकविमरविन्दं सकुशलं
कपाली योगीशश्चरति भुवनं भिक्षुकवरः।। ८

# मेघाष्टकम्!!

देशे क्वचित् क्वचिदहो जलवृष्टिपाताद्
ग्रामा गृहाणि जनता पशवः खगाश्च।
मग्ना जले सकरुणं विलपन्ति हन्त!
रे मेघ! निष्ठुर! जलं न विमुञ्च बन्धो!! १

संलक्ष्यते क्वचिदहो ननु जानुमात्रं
तोयं क्वचित्कटितटं सलिले सलीलम्।
स्कन्धं क्वचित्स्पृशति वृष्टिजलं नगर्यां
रे मेघ! निष्ठुर! जलं न विमुञ्च बन्धो!! २

केचिन्मृताः स्वसदने बहवः शयाना
याताः क्वचित् क्वचिदहो सलिलेषु केचित्।
भग्नं कुटीरमभवत् खलु भिक्षुकस्य
रे मेघ! निष्ठुर! जलं न विमुञ्च बन्धो! ३

सौधं तथैव धनिनां तरतीव तोये
गन्त्री न याति सलिलेषु क्वचिद् वराकी।
अङ्के निधाय जननी स्वशिशुं विपन्ना
रे मेघ! निष्ठुर! जलं न विमुञ्च बन्धो!! ४

वृक्षा लता घनवनं भुवि सेतुबन्धो
भग्नो जले निपतितस्तव धारयेह।
नावश्चरन्ति भुवि राजपथेषु वीथ्यां
रे मेघ! निष्ठुर! जलं न विमुञ्च बन्धो! ५

कस्मात् प्रवर्षसि जलं क्वचिदेव पूर्णं
कुत्रापि रावयसि शून्यजलं प्रवर्षन्।
इत्थं त्वदीयचरितं नहि वेद्मि नेतो
रे मेघ! निष्ठुर! जलं न विमुञ्च बन्धो!! ६

पृथ्वी क्वचित् तपति हा डयते प्रधूलिः
स्वेदः सखे! झरझरं नवनिर्झरः सन्।
गच्छन् ललाटपटलाद् विरमत्यहो नो
रे मेघ! निष्ठुर! जलं प्रविमुञ्च बन्धो! ७

व्यर्थं समुद्रतटवर्तिजनेषु वृष्टिं
पूर्णेस्थले सलिलराशिद! वर्षसि त्वम्।
क्षेत्रं बडौतमपि ते कुरुते प्रतीक्षां
रे मेघ! निष्ठुर! जलं प्रविमुञ्च बन्धो! ८

# जगन्नाथोद्य यात्रान्ते प्रत्यागच्छति मन्दिरम्




प्रो. बनमाली बिश्वालः

दर्शनस्य फलं यावदावर्षं मुख्य-मन्दिरे।
लभ्यते हि फलं तावद्गुण्डिचामन्दिरे दिने।।
आडपमण्डपस्यैव महाप्रसादसेवनम्।
काले च रथयात्रायाः महद्धि पुण्यकारकम्।।
गुण्डिचामन्दिरं चास्ति जन्मवेदी महाप्रभोः।
अवस्थानं च देवानां स्वास्थ्यलाभाय कल्प्यते।।
स्वास्थ्यमवाप्य सम्पूर्णं बाहुडायां महाप्रभुः।
प्रत्यावर्तनयात्रायां प्रस्थितो मुख्यमन्दिरम्।।
विहाय जन्मवेदीं च कर्मवेदीं समागतः।
मध्येमार्गं विरम्यैव पोडपिठां च भुक्तवान्।।
प्रत्यावर्तन-यात्रैव बाहुडेति निगद्यते।
जगन्नाथोद्य यात्रान्ते प्रत्यागच्छति मन्दिरम्।।
लक्ष्म्याः कोपः क्वचिच्छान्तो दिनेष्वेषु भवेत् स्वतः।
विचिन्त्यैवं जगन्नाथः सानन्दमनुतिष्ठते।।
आत्मानं स्वास्थ्यलाभान्ते सज्जीकर्तुं रुचिर्यतः।
भक्तैश्च स्वर्णवेशोस्ति दिनात्परं प्रकल्पितः।।
ततोधरपणां पीत्वा सर्वात्मना सुसज्जितः।
महाराजाधिराजस्तु गमिष्यति स्वमन्दिरम्।।
बाहुडायां समे भक्ताः दृश्यन्ते वै प्रफुल्लिताः।
देवान् रथोपविष्टांश्च प्रापयिष्यन्ति मन्दिरम्।।

# सद्गुरुस्तुतिपञ्चकम्

(शार्दूलविक्रीडितम्)



डॉ श्रेयांश द्विवेदी
संस्थापक कुलपति

यावत् स्वस्थमिदं शरीरममलं चित्तं च मोमुद्यते ,
वागेषा स्मरणात्मिका सुविमला नेत्रे च कर्णौ सदा ।
यावद् विश्वमिदं विभाति रविणा लोका समस्ता इमे ,
तावत् सद्गुरुणा वयं सुनियता देवं गुरुन्नुमः ।।1।।

यावत्स्थावरजङ्गमं सुविपुलं यावद्धरा दुर्धरा,
यावच्चन्द्रदिवाकरौ सुरनदी गोदावरी नर्मदा।
अश्वत्थो वटवृक्षजातिसदृशाः यावद्धि भूमण्डले,
तावत् सद्गुरुणा वयं सुनियता देवं गुरुन्नुमः ।।2।।

सत्यासत्यमिदं विभाति नितरां यावच्च वादद्वयम्,
नानारूपपरं शिवं सुखकरं यावच्च शान्तिप्रदम्।
आचार्याय समर्पणं प्रतिदिनं यावच्च मानं जनैः,
तावत् सद्गुरुणा वयं सुनियता देवं गुरुन्नुमः।।3।।

यावद्धर्मविधर्मणीह च विबुधान् व्यामोहयेतां परम्,
यावत् कर्मविकर्मणीच नितरामग्रे सरन्तो जनाः।
यावच्चित्रविचित्रभित्तिलिखिता आदर्शभूता नराः,
तावत् सद्गुरुणा वयं सुनियता देवं गुरुन्नुमः।।4।।

यावत् सत्ययुगं विभाति सततं त्रेतायुगं द्वापरं,
यावद्वर्णनमद्भुतं कलियुगे विद्वद्भिरुद्गीयते।
रामो राजमणिस्तथाद्य गुरवो यावद् गुरुर्भारती ,
तावत् सद्गुरुणा वयं सुनियता देवं गुरुन्नुमः।।5।।

# 'आर्याणांवैश्विकमहासम्मेलनं न्यूयॉर्कनगरे सम्पन्नम्'

न्यूयॉर्क, (प्रो विनय विद्यालंकार) आर्य प्रतिनिधि सभा अमेरिकायाः तत्वावधाने 18 तः 21 जुलाई 2024पर्यंतं महर्षि दयानंदस्य 200 तम जयंतीम् आर्य समाजस्य 150 स्थापना वर्षम् अभिलक्ष्य 'ग्लोबल आर्य सम्मिट' आयोजितम् स सम्मेलने विश्वस्य16 देशानां सत्य सनातन वैदिक धर्मी आर्याः भागमगृह्णन् । उक्त सम्मेलनय आयोजनम् आर्य प्रतिनिधि सभा अमेरिका द्वारा




होफस्ट्रा यूनिवर्सिटी लॉन्ग आयरलैंड न्यूयॉर्कनगरे कृतम्। आर्यमहासम्मेलनस्य उद्घाटनं सामवेद पारायण यज्ञेन जात, यत्र विश्वस्य यजमानाः आहुतिं दत्तवन्तः। मुख्य यजमान रूपेण 'ज्ञान ज्योति पर्वस्य' अध्यक्षः भारतय प्रसिद्ध उद्योगपतिः श्री सुरेंद्र कुमार आर्यः( चेयरमैन जे बी एम ग्रुप)प्रतिभागम् अकरोत्। कार्यक्रमस्य उद्घाटन सत्रे न्यूयॉर्क नगरे भारतस्य जर्नल काउंसलेट श्री बिनय श्रीकान्त प्रधानः मुख्यातिथिः अवर्तत। भारतात् स्वामी आवेशः, श्री सुरेन्द्र कुमार आर्यः, श्री विनय आर्यः , स्वामी देवव्रतः, प्रोव विनय विद्यालंकारः, प्रोव कमलेश चौकसी, साध्वी उत्तमा यतिः, गयानात: डॉ सतीश प्रकाशः, दक्षिण अफ्रीकायाः स्वामी वेदानन्दः, दर्शनाचार्यः आशीषः, डॉ भारतेन्दु द्विवेदी, डॉ धनञ्जय आचार्यः, डॉ प्रशान्त आचार्यः, अमेरिकायाः डॉ रमेश गुप्ता, डॉ दीनबन्धु चन्दोरा इत्येभिः सहिताः अनेके विद्वांसः विदुष्यश्च उपस्थिताः । आर्य प्रतिनिधि अमेरिकापरतया प्रधानः श्री भुवनेश खोसला एवं च महामंत्री श्री विश्रुत आर्यः संचालनदायित्वं निरवहत्। सम्मिलित प्रतिनिधिषु अमेरिकायाः अलावा मॉरीशस, भारत, कनाडा, ऑस्ट्रेलिया, त्रिनिडाड, फीजी, सूरीनाम, सिंगापुर, गयाना, न्यूजीलैंड, हॉलैंड इत्येषाम् अनेकेषां देशानां प्रतिभागिनः भागमगृह्णन्। सम्मेलने अनेकेषु विषयेषु चर्चा अभवत्। यत्र 'महर्षि दयानंदस्य मानव जातेः कल्याणे योगदानम्' इति प्रमुख विषयः आसीत् आर्य समाजस्य नियमानां व्यावहारिकं वैज्ञानिकं महत्वं च उत्तराखंडतः (भारतात्) प्राप्तः प्रोव विनय विद्या अलंकारः प्रत्यपादयत्। सार्वदेशिक आर्य प्रतिनिधि सभायाः उपप्रधानः श्री विनय आर्यः कथितवान् यद्वर्तमानपरिस्थितीनां समाधाने केवलम् आर्य समाजः एव स्पष्ट दृष्टिं स्थापयति। जूम माध्यमेन योग गुरु स्वामी रामदेवः महर्षि दयानन्दस्य अप्रतिम योगदानस्य चर्चां कुर्वन् उक्तवान् यद्वर्तमान सनातन समाजस्य रक्षायै आर्य समाजः अग्रे आगच्छेत। अस्मिन् कार्यक्रमे अनेकाः महिलाः विदुष्यः, सन्यासिनो विद्वांसः समस्त हिंदू समाजः इत्येतान् आहूय कथितं यद् वर्तमान परिस्थितीः पारस्परिकमतान्तर्यम् उपेक्ष्य एकमेव मंचम् आगच्छेम वयमित्येव अपेक्षितं विद्यते। विश्वस्य अनेकेषु देशेषु लक्षशः संख्यकाः हिंदवः स्वीयसंस्कृतेः रक्षायै वचनबद्धाः कटिबद्धाश्च भवन्ति।

महासम्मेलनस्य अंते संकल्पः स्वीकृतः यत् वयं सर्वे स्वेस्वे देशे गत्वा वैदिक संस्कृतिं महर्षि दयानन्दस्य विचारान् आधुनिकरीत्या प्रचारयितुं संलग्नाः भविष्यामः इति।

# गुरुबिरजानन्दगुरुकुलमहाविद्यालये गुरुपूर्णिमामहोत्सवः हर्षोल्लासेन समाचरितः

करतारपुरम्। गुरु विरजानन्द गुरुकुल महाविद्यालय करतारपुरे गुरु पूर्णिमा महोत्सवं महता हर्षोल्लासेन सह महाविद्यालयपरिवारः समाचरत्। तत्र प्राचार्यः डॉ. उदयन आर्यः महाविद्यालयेन सह सम्पृक्तेभ्यः वध



पिनानि प्रदत्तवान्। तेनोक्तं यद्वयं तेभ्यः सर्वेभ्यः गुरुभ्यः, शिक्षकेभ्यः माता-पितृभ्यश्च हार्दिकं आभारं व्यक्तीकुर्मः ये एतद् आयोजनं दिव्यतया भव्यतया सह सफलीकृतवन्तः। उत्सवस्य प्रारंभः यज्ञेन वेदमंत्रोच्चारणेन दीपक प्रज्वलनेन च जातः। गुरुकुलस्य प्रधानः श्रीमान् ध्रुव कुमार मित्तलः ,कोषाध्यक्षः श्रीमान् ओमप्रकाश अग्रवालः , वरिष्ठ सदस्यः श्रीमान् कुन्दन अग्रवालः , उप प्रधानः श्रीमान् डा.सुधीर शर्मा , प्रधाना श्रीमती सुशीला भगतः, उप प्रधानः कैलाश अग्रवालः,स्नातक प्रधानः नरेंद्र गांधी ,गौरव सरीनः , भजन उपदेशकः राजेश प्रेमी, रंजीत आर्यः कार्यक्रमे मुख्यतया आसन्।

आचार्य संदीप आर्यः अकथयत् यद् गुरोर्मार्गदर्शनं , विद्यार्थिभ्यः अत्यंतम् आवश्यकम्।

संस्थाप्रधानः अकथयत् यत् श्रीमान ध्रुव कुमार मित्तलः विवेकानन्दः , रामकृष्ण परमहंसः दयानन्दः, विरजानन्दश्च इत्येषां गुरुशिष्यसंबंधः व्यावसायिकः नासीत्।

डॉ महावीर अग्रवालः प्रतिकुलपतिः (पतञ्जलिविश्वविद्यालयः,हरिद्वारम्) अकथयत् आचरणं यः शिक्षयति सः आचार्यः गुरुर्वा कथ्यते। गुरुकुल परंपरा विद्यार्थिनः सरलविनम्रान् स्वावलंबिनश्च विनिर्माति। अवसरेऽस्मिन् जालन्धरं, कादिया मोगा, अमृतसरं, फगवाड़ा, लुधियाना, कपूरथला इत्यादिभ्यः विविध प्रांतीयाः आर्य समाज सदस्याः स्थानीय जनाः गुरुकुल परिवारस्य सर्वे सदस्याश्च उपस्थिताः आसन्।

# के० सं० विश्वविद्यालयस्य भोपाल-परिसरे भाषावबोधनवर्गस्य समापनसमारोहः अनुष्ठितः

(वार्ताहरः- प्रवेशकुमारशुक्लः भोपाल ) केन्द्रीयसंस्कृतविश्वविद्यालयस्य भोपालपरिसरे दशदिवसीयसरलसंस्कृतसम्भाषणशिविरस्यायोजनमभवत् । विशिष्टरूपेण शिक्षाचार्यच्छात्राणां कृते 'भाषावबोध



नवर्गस्यापि समायोजनमभूत्। आदौ मातुः सरस्वत्याः पूजनेन माल्यार्पणेन दीपप्रज्वालनेन च कार्यक्रमस्य शुभारम्भः जातः। कार्यक्रमेऽस्मिन् मुख्यातिथिरूपेण राष्ट्रियसंस्कृतसंस्थानस्य भोपालपरिसरस्य प्राचार्यचराः प्रो० विद्यानन्दझावर्याः, विशिष्टातिथिरूपेण संस्कृतभारत्याः अखिलभारतीयसम्पर्कप्रमुखाः श्री शिरीषदेवपुजारी महोदयाः, विश्वविद्यालयस्य छात्रकल्याणसमितेः अधिष्ठातारः प्रो० मदनमोहनझामहाशयाः , परिसरस्य शिक्षा शास्त्रविद्याशाखायाः शाखाप्रमुखाः प्रो० नीलाभतिवारिमहोदयाः , कुशलपरिसरनिदेशकाः प्रो० रमाकान्तपाण्डेयाःसभायाः आध्यक्षपदमलंकृतवन्तः। भारतीयपरम्परानुसारेण आगतामतिथीनां स्वागतभाषणं श्रीअनमोलझा, भाषावबोधनवर्गस्यानुभवकथनं-शिक्षाचार्यकक्षायाः छात्राः दीपिकाकौशला , प्रवेशकुमारशुक्लश्च कृतवान्। धन्यवादज्ञापनं श्रीरत्नेशदूबे , मञ्चसंचालनं श्रीआशुतोषद्विवेदी , कृतवन्तौ। सम्भाषणशिविरस्य मुख्यमुद्देश्यमासीत् यत् सर्वेषां छात्राणां मुखे संस्कृतभाषा भवेत् । अन्ते च शान्तिमन्त्रेण सभायाः समापनमभवत्।

# बालभारतीपब्लिकविद्यालये समायोजितागुरुपूर्णिमोत्सवः

संवाद लेखकः -सौरभः दे

ओडिशा एनटीपीसी दर्लिपालि-जूलाई मासे एकविंशति दिनाङ्के बालभारती पब्लिकविद्यालये पालितः गुरुपूर्णिमोत्सवः। अनुष्ठानस्यारम्भः विद्यालयस्य प्रधानाचार्यान् नीरजा तिवारी महाभागाः सुवासितैः पुष्पैः स्वागतेन अभवत्। परं प्रधानाचार्या: महाभागा: दीपज्योतिप्रज्वलनं कृतवती। अस्मिन् कार्यक्रमे सर्वे छात्राः भागग्रगणं कृतवन्तः। छात्रेषु केचन गीतं नृत्यं च कृतवन्तः। षष्ठ-सप्तमीकक्षायाः छात्राः स्वरलययतिपूर्वकं अर्थसहितं गुरुमन्त्रं गीतवन्त। विद्यालयस्य शिक्षकाः महाभागाः अरुणकुमाराः गुरुदिवस्योपरि ज्ञानवर्धकं भाषणं दत्तवान्। प्रधानाचार्याः श्रीमन्त्यः छात्रान् प्रति उपदेशं दत्तवती। उक्तवत्यः च गुरुः के भवितुं अर्हति। सर्वोपरि माता एव आद्या गुरुः। परं पिता। यतो हि 'गर्भे धारणत्वात्, पालनत्वात् च'। एतदपि उक्तवत्यः - छात्रजीवने किं कर्तव्यम्। छात्राः गुरोः चित्राणि मन्त्रपूर्वकं अङ्कितवन्तः । अन्ते जातीयसंगीतेन अनुष्ठानस्य समाप्तिः घोषितः।



# गुरुपूर्णिमायाः पूर्वसन्ध्यावसरे उत्तरप्रदेशसंस्कृतसंस्थानद्वारा गुरुसम्मानसमारोहे 'भारतीय-शिक्षा-प्रणाल्यां गुरुशिष्यपरम्परेति' विषयमवलम्ब्य व्याख्यानगोष्ठी च समायोजिता






संस्कृतभवनम्, लखनऊ – प्रदेशस्य विभिन्नजनपदेभ्यः समागतानां संस्कृतविद्यालयेभ्यः / महाविद्यालयेभ्यश्च सेवानिवृत्तान् संस्कृतशिक्षकान् अन्यांश्च गुरुजनान् सम्मानयितुं समनुष्ठितेस्मिन् भव्ये कार्यक्रमे सर्वप्रथमं




दीपं प्रज्ज्वलनेन जातम्।

माल्यार्पणेन मुख्यातिथीनां स्वागतं निदेशकः विनयश्रीवास्तवः अकरोत् । तेन भाषितं यत् संस्कृतसंस्थानेन स्वीयस्थापनाकालतः गुरुपूर्णिमाकार्यकमः आयोज्यते। तत्र विगतेभ्यो कतिपयवर्षेभ्यः संस्कृतस्य सेवानिवृत्तशिक्षकान्



सम्मानयति। तमेव उपक्रमं विस्तारीकर्तुं स्वीयसंसाधनैः बालेभ्यः संस्कृतं निःशुल्कं शिक्षयतां संस्कृतव्रतीनामपि 2019 इत्यस्माद्वर्षात् गुरुजनानां विशेषेण सम्मानकार्यक्रमोऽयम् आयोज्यमानः विद्यते। एतावत्पर्यन्तम् अनेन 1000 सङ्ख्यकानां सम्माननं जातम्।

मान्येन निदेशकेन वर्येण प्रौक्तं यद्गुरुपूर्णिमा इयं वर्षतौ आषाढपूर्णिमायां समाचर्यते। गुरुपूजा तावदत्र विधीयते। गुरुपूर्णिमातः मासचतुर्ष्टयं यावत् परिव्राजकाः साधवः-सन्यासिनश्च एकत्रैव स्थित्वा ज्ञानगङ्गा प्रवाहयन्ति। वातावरणदृष्ट्या अपि मासचतुष्टयं सर्वश्रेष्ठम् । नाधिकम् ऊष्णं न शीतञ्च । अतः अध्ययनाय उपयुक्तमपि इदं मान्यते। सूर्यतापेन तप्तभूमौ वर्षया शीतलता उत्पाद्य तस्यै शक्तिर्लभ्यते। तथैव गुरुचरणेषु उपस्थितेभ्यः साधकेभ्यः ज्ञानं, शान्तिं, भक्तिं, योगं च प्राप्तुं शक्तिः प्राप्यते।

कार्यक्रमे अतिथिरूपेण आमत्रितः नैमिषारण्यतः समागतः डॉ० द्वारिकादासः गुरुवन्दनापूर्वकं विश्वसारतन्त्रम् उद्धृत्य गुरुपरम्परायाः महत्वं प्रकाशितवान् । तेन धर्मः व्यवहारेण परिभाषयितुं शक्यः इति प्रतिपादितम्।

प्रो० ओमप्रकाशपाण्डेयः वेद व्यासस्य व्यक्तित्वस्य कृतित्वस्य च विशद्विवेचनम् अकरोत् । तेन उद्बोधितं यद्वेदचतुष्टय-पुराणेतिहासानां लोकोद्धारकं प्रणयनं व्यासेन विहितम् । ततः एव गुरुपरम्परा इयम् अस्मदीया समारब्धा।

प्रो० आजादमिश्रः गुरुशिष्यपरंपरायाः संवाहकतत्वानां विवेचनमकरोत्तेन गुरौ शिष्यत्वम्, आचरणं, व्यवहारः इत्यादीनि अत्यन्तम् आवश्यकानि तत्त्वानि प्रतिपादितानि। यानि महर्षिव्यासस्य व्यक्तित्वे कृतित्वे




च आसन्।

डॉ० रामसुमेरयादवः अकथयत् यद्गुरुतत्त्वस्य गौरवं व्याख्यातुं न केनापि वाण्या वर्णयितुं शक्यम्। व्यक्तित्वस्य समस्तोपलब्धीनां श्रेयः सदैव गुरवे एव प्रतिपद्यते।

सरस्वतीवन्दनया कार्यक्रमस्य आरम्भः जातः।

विशिष्टेषु विद्वत्सु गणमान्येषु च नव लता , डा सरेन्द्रझा, डॉ रेखा शुक्ला, भूतपूर्वसर्वेक्षिका डॉ चन्द्रकलाशाक्या, डॉ बच्चाभारती, संस्कृतसंवादपाक्षिकसमाचारपत्रस्य सम्पादकौ वेदप्रकाशशर्मा, डॉ मंजुशर्मा, डॉ रीतातिवारी, विनोदकुमारमिश्रः च संस्थानेन सम्पृक्ताः विद्वांसश्च कार्यक्रमं सनाथितवन्तः शोभितवन्तश्च।

सम्मानसमारोहेऽस्मिन् प्रदेशस्य विभिन्नजनपदेषु संस्कृतविद्यालयेभ्यः महाविद्यालयेभ्यश्च सेवानिवृत्ताः




संस्कृतशिक्षकाः पत्रकाराः सम्पादकाः विद्यालयप्रबन्धकाः संस्कृतस्वाध्यायप्रवचनशीलाः अथ च संस्कृतसेवाव्रतिनश्च माल्यार्पणपूर्वकम् अङ्गवस्त्रं स्मृतिचिह्नं च प्रदाय मञ्चस्थैः अतिथिभिः सम्मानिताः। लखनऊस्थश्रीशिवप्रसादसंस्कृतविद्यालयस्य वैदिकबटवः मन्त्रोच्चारणेन कार्यक्रमस्य शोभां वर्धितवन्तः।

वरिष्ठप्रशासनिकः दिनेशमिश्रः समागतान् स्वागतीकृतवान्। सयोजकः सर्वेक्षकः महेद्रपाठकः प्रास्ताविकम् अपठत। प्रशासनिकाधिकारिणा जगदानन्द झामहोदयेन कुशलतया मञ्चसञ्चालनं विहितम् । प्रधानसहायकः भगवानसिंहचौहानः, कनिष्ठ सहायिका पूनम, लेखाकारः नितेश श्रीवास्तवः, आशुलिपिकः वीरेन्द्रतिवारी, ऋषभपाठकः, शान्तनुमिश्रः, शिवमगुप्ता इत्येतान् समेत्य समन्वयकेषु धीरज मैठाणी , राधाशर्मा , दिव्यरंजनः, अनिलगौतमः, च अवर्तन्त। अमुष्मिन्नवसरे संस्थानस्य कर्मचारिणः , लखनऊस्थाः संस्कृतज्ञाः संस्कृतशिक्षकाः छात्राः छात्र्यश्च संस्कृतानुरागिणः सामाजिकाः च समुपस्थिताः आसन्।

अस्माकं प्रेरणास्रोतः- स्व.पं०रामकिशोरशर्मा, स्व.पद्मश्री डॉ.रमाकान्तशुक्लः
परामर्शकाः-डॉ.बलदेवानन्दसागरः, डॉ.अरविन्दकुमारतिवारी, डॉ.राधेश्यामअवस्थी, प्रो.(डॉ.)अजितकुमारजैनः
सम्पादिका-मञ्जूशर्मा, सम्पादकमण्डलम् - डॉ.सुन्दरनारायणझा, डॉ.सुरेन्द्रमहतो, डॉ.विमलेन्दु कुमार त्रिपाठी, डॉ.संदीपकुमार उपाध्याय, धीरजमैठाणी, प्रबन्धसम्पादकौ-वेदप्रकाशशर्मा, नेहाशर्मा च,

स्वत्वाधिकारिण्या, मुद्रिकया, प्रकाशिकया सम्पादिकया च मञ्जूशर्ममहोदयया लक्ष्यप्रिंटर्स,521/8 बी, भूतलं , वितिका सं. - 14, आदर्शमोहल्ला, मौजपुरनगरम् , देहली-53तः मुद्रापयित्वा ए-2/32, वजीराबादमार्गः भजनपुरा, देहली-53 इत्यतः प्रकाशितम्।
दूरभाष : 09311086751 ई-मेलः sanskritsamvad@gmail.com, RNI No. : DELSAN/2011/38660 DL(E)-20/5534/2021-23 केन्द्रीयसंस्कृतविश्वविद्यालयः नवदेहली अनुदानेन प्रकाश्यमानं पत्रमिदम्।